दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लसप्तमी
चैत्र 11 प्रविष्ठांशः मङ्गलमयः भवेत्


■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-152 | 1 | मार्च 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 बिलासपुरे देववाण्याः लोकसंस्कृतेश्च त्रिवेणी- संगमः, हिमाचल- संस्कृत- अकादमी- भाषाविभागयोः भव्यायोजनम्

3 (पेट्रोल-डीजलयोः) तैलमूल्यानां वृद्धिः जनसामान्यस्य कोषे आक्रमणमिव अस्ति- सांसदः अनुरागसिंहठाकुरः

5 महर्षि महेश योगी वैदिकविश्वविद्यालये ज्ञानवर्धकं च विशेषज्ञव्याख्यानस्य आयोजनम्


## सर्वोच्चन्यायालयेन निर्णयः प्रदत्तः यत् केवलं हिन्दु-सिख-बौद्ध-मतानुयायिनः एव अनुसूचित जाति-श्रेण्याः योग्याः सन्ति



सर्वोच्चन्यायालयेन निर्णयः प्रदत्तः यत् केवलं हिन्दु-सिख-बौद्ध-मतानुयायिनः एव अनुसूचित जाति-श्रेण्याः योग्याः सन्ति। न्यायालयेन स्पष्टीकृतं यत् अन्यं मतं प्रति, यथा क्रिश्चियन्-मतं प्रति धर्मान्तरणस्य अनन्तरम् अनुसूचित जाति-स्थितिः तत्क्षणमेव पूर्णतया च नष्टा भवति । आन्ध्रप्रदेशस्य उच्चन्यायालयस्य आदेशस्य समर्थनं कुर्वन् सर्वोच्चन्यायालयेन निर्णयः प्रदत्तः यत् एकदा कश्चन जनः ईसाईमतं स्वीकृत्य सक्रियतया तस्य मतस्य प्रचारं आचरणं च करोति चेत्, तदा सः अनुसूचितजात्याः सदस्यत्वेन न गण्यते। न्यायाधीशः पी. के. मिश्रः मनमोहनः च इतोऽपि निर्णयम् अकुर्वतां यत् यः दलित-जनः ईसाईमतं स्वीकरोति सः अनुसूचित-जाति-अनुसूचित-जनजाति (अत्याचार निवारणम्) अधिनियमस्य अन्तर्गतं रक्षणं याचयितुं न शक्नोति ।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिम-एशिया-क्षेत्रे शान्तिं पुनः स्थापयितुं संवादस्य कूटनीतेः च आह्वानम् कृतम्




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिम-एशिया-क्षेत्रे शान्तिं पुनः स्थापयितुं संवादस्य कूटनीतेः च आह्वानम् कृतम्। पश्चिम-एशियायां वर्तमानस्य संघर्षस्य विषये राज्यसभायां भाषमाणः अस्मिन् विषये भारतस्य स्थितिं स्थापयन्, श्रीमोदी अवदत् यत्, भारतं समाह्वानम् न्यूनं कर्तुं, होर्मुज्-जलसंधेः पुनः उद्घाटनस्य च विषयं उत्थापयत् । प्रधानमन्त्री श्रीमोदी अवदत् यत्, अस्मिन् युद्ध-काले अपि भारतीय-नौका-यनानां सुरक्षित-सञ्चारम् सुनिश्चेतुं कूटनीतिमाध्यमेन भारतं निरन्तरं प्रयतमानः अस्ति । श्रीमोदीः अवदत् यत्, पश्चिम-एशियादेशे वर्तमानं युद्धं इदानीं चतुर्थे सप्ताहे प्रचलति, येन सम्पूर्णे विश्वे गम्भीरः ऊर्जा सङ्कटः उत्पन्नः अस्ति। सः अवदत् यत्, भारतस्य कृते अपि एषा स्थितिः चिन्तायाः विषयः अस्ति। अनेन द्वन्द्वेन व्यापारमार्गाः प्रभाविताः भवन्ति। सः अवदत् यत्, अनेन पेट्रोल, डीज़ल, गैस, उर्वरकेत्यादीनां आवश्यकवस्तूनां नियमितापूर्तिः बाधिता भवति। प्रधानमन्त्री अवदत् यत् गतदिनेषु विश्वस्य विभिन्नेभ्यः देशेभ्यः अशोधिततैलं, एल्. पी. जी. इत्येतैः च पूरितानि नौकायानानि भारतं प्रति आगतानि सन्ति। सः अवदत् यत्, भारतं उर्वरकानि, तैलं, गैस इत्यादीनि आवश्यकवस्तूनि वहन्तः सर्वाः नौकाः सुरक्षितरूपेण प्राप्तुं प्रतिबद्धः अस्ति। प्रधानमन्त्री अवदत् यत् प्रायः एककोटिः भारतीयाः गल्फ् देशेषु निवसन्ति, कार्यं च कुर्वन्ति। सः अवदत् यत्, तेषां जीवनस्य जीविकायाः च सुरक्षां सुनिश्चितं करणीया अपि भारतस्य कृते प्रमुखा चिन्ता अस्ति। सः अवदत् यत्, द्वन्द्वस्य आरम्भादारभ्य, अद्यावधि पञ्चसप्तति-सहस्रोत्तर-त्रिलक्षाधिकाः भारतीयाः इरान-देशात् सुरक्षितरूपेण भारतं प्रत्यागताः । प्रधानमन्त्री अवदत् यत् प्रशासनं प्रत्येकस्मिन् क्षेत्रे अन्येषु देशेषु निर्भरता न्यूनीकर्तुं निरन्तरं प्रयतमानः अस्ति। सः अवदत् यत्, आत्मनिर्भरम् एव एकमात्रं व्यवहार्यमार्गः अस्ति। श्रीमोदी अवदत् यत् भारतं अस्य सङ्कटकालस्य न्यूनतमं प्रतिकूलप्रभावं सम्मुखीकर्तुं निरन्तरं प्रयतमानोस्ति। सः अवदत् यत्, भारतस्य अर्थव्यवस्थायाः आधाराः प्रबलाः सन्ति, तथा च प्रशासनं द्रुतगत्या परिवर्त्यमानां स्थितिं निकटतया निरीक्षमाणः अस्ति।

## असम-केरलम्-पुदुचेरी-राज्यानां विधानसभा-निर्वाचनानां नामाङ्कनपत्राणां परीक्षणं समाप्तम्

असम-केरलम्-पुदुचेरी-राज्यानां विधानसभानिर्वाचनानां नामाङ्कनपत्राणां परीक्षणं गतदिवसे समाप्तम्। नामाङ्कनपत्राणां प्रस्तुतीकरणं परह्येव समाप्तम् आसीत् । नामांकन-निराकरणस्य अन्तिमः दिवसः गुरुवासरः अस्ति। अग्रिमे मासे नवमे दिनाङ्के द्वयोः राज्ययोः तथा केन्द्रशासितप्रदेशे च एक-चरणे मतदानं भविष्यति। मतानां गणना मई-मासस्य चतुर्थे दिनाङ्के भविष्यति ।



## केन्द्रसर्वकारस्य निरन्तर-प्रयासानां कारणात् देशे कृषकाणां आयः वर्धितः - शिवराजसिंह चौहानः

केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत् केन्द्रसर्वकारस्य निरन्तरप्रयासानां कारणात् देशे कृषकाणां आयः वर्धितः अस्ति। लोकसभायां प्रश्नोत्तरकाले अनुपूरक प्रश्नस्य उत्तरं ददता श्रीचौहानः अवदत् यत्, कृषकाणां आयः न केवलं द्विगुणं, अपि तु अनेकेषु प्रकरणेषु त्रिगुणं, अष्टगुणं यावत् च वर्धितम्। चतुर्दशाधिक द्विसहस्रतम वर्षादारभ्य देशे खाद्यान्नस्य उत्पादनं चतुश्चत्वारिंशत् प्रतिशतं यावत् वर्धितम् इति सः अवदत् । कृषिमन्त्री अवदत् यत् प्रधानमन्त्री-किसान-सम्मान-निधि योजनायाः अन्तर्गतं कृषकाणां कृते प्रतिवर्षं षट् सहस्ररूप्यकाणां आर्थिकसहायं प्रत्यक्षतया तेषां बैंक लेखासु प्रदत्ता भवति ।

## उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षता कृतवान् रक्षामंत्री राजनाथसिंहः ।

रक्षामंत्रिणा राजनाथसिंहेन वैश्विक क्षेत्रीय-सुरक्षा-विकासानां दृष्ट्या उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षता कृता। एषा समीक्षा सभा तदा अभवत् यदा वर्तमानः पश्चिम-एशिया-सङ्घर्षः चतुर्थे सप्ताहे प्रविष्टम्, येन वैश्विक-व्यापार-मार्गाः, विशेषतः होर्मुज़-जलसंधिद्वारा, महत्वपूर्णरूपेण बाधिताः भवन्ति। सभायां रक्षा क्षेत्रस्य नैके अधिकारिणः उपस्थिताः आसन् ।

## नवरात्रिविशेषः

## सप्तमी कालरात्रिः



**वामपादोल्लसल्लो-हलताकण्टकभूषणा। वर्धनमूर्धध्वजा कृष्णा कालरात्रिर्भयङ्करी॥**

कालरात्रिः भगवती अन्धकारं विनाश्य प्रकाशं आनयति। सा कालस्य अपि कालः अस्ति, अतः तस्याः उपासनेन भयं नश्यति।

**२. उपासना मंत्र (Upasana Mantra)**

या देवी सर्वभूतेषु माँ
कालरात्रि रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः॥


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# बिलासपुरे देववाण्याः लोकसंस्कृतेश्च त्रिवेणी- संगमः, हिमाचल- संस्कृत- अकादमी- भाषाविभागयोः भव्यायोजनम्



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** हिमाचल-संस्कृत- अकादमी हिमाचलसर्वकारः (शिमला) तथा भाषा-संस्कृति-विभागस्य (बिलासपुरम्) संयुक्त-तत्त्वावधाने जिला-मुख्यालये 'सांस्कृतिक- व्याख्यानस्य बहुभाषीय-कविसम्मेलनस्य च' भव्यम् आयोजनं कृतम्। अस्मिन् कार्यक्रमे विद्वांसः बिलासपुरस्य ऐतिहासिक-नामकरणे ऋषि- परम्परायां च प्रकाशं व्याख्यातवन्तः, स्थानीयकवयश्च स्वकाव्यरचनाभिः समाजस्य यथार्थं प्रस्तुतवन्तः।

## विदुषां सारगर्भितं व्याख्यानम्

कार्यक्रमस्य शुभारम्भः वैदिक-लौकिकाभ्यां मङ्गलाचरणाभ्यां जातम्। ततः हिमाचल- राजकीय-संस्कृत- शिक्षकपरिषदः प्रदेशाध्यक्षः कमलकांतगौतमः प्रास्ताविकम्, अकादम्याः गतिविधिविषये च प्रकटीकरणम् अकरोत्। जिला- भाषाधिकारिणी नीलम-चन्देल-महोदया बिलासपुरस्य नामकरणस्य विलक्षणां भाषाशास्त्रीय- व्याख्यां कुर्वती उक्तवती यत् 'बिलासपुर' इति शब्दः 'बिल' (गुहा/व्यासगुहा) तथा 'आस्' (निवासः/अस्ति वा) इत्यनयोः संयोगात् निष्पन्नः अर्थात् बिलस्य गुहायाः वा समीपे पुरम् इति बिलासपुरम्। इमं जनपदं महर्षि- व्यासस्य तपोस्थलीति प्रमाणीकरोति। मुख्यवक्ता डॉ. एल. आर. शर्मा 'जीवने संस्कृतेः संस्काराणां च उपयोगिता' इति विषये बलं दत्त्वा उक्तवान् यत् भारतीया संस्कृतिः उदारचिन्तनस्य गङ्गाजलसदृश-शौचस्य च संवाहिका अस्ति। तथैव डॉ. मनोजशैल-महोदयः महर्षि-व्यास-परम्परां भारतीय-वाङ्मये 'व्यास' इति शब्दः केवलं कस्यचिद् एकस्य व्यक्तिविशेषस्य नाम नास्ति, अपि तु एषः एकायाः सुदृढायाः अनाद्याश्च परम्परायाः प्रतीकः वर्तते। श्रुति-स्मृति-पुराणानां च ज्ञानं येन माध्यमेन प्रवहमाणं सत् अद्य अस्मान् प्राप्तमस्ति, सैव खलु 'व्यास-परम्परा'। इयं परम्परा ज्ञानस्य संहिताकरणस्य (Codification), सरलीकरणस्य तथा युगानुकूल-प्रस्तुतीकरणस्य च एकं जीवन्तम् उदाहरणं विद्यते। व्यास' इति केवलं कस्यचिद् एकस्य व्यक्तिविशेषस्य नाम नास्ति, अपितु एतत् एकस्य पदस्य नाम वर्तते, एकस्य उत्तरदायित्वस्य च प्रतीकम् अस्ति, यत् भिन्न- भिन्न- कालेषु विविधैः ऋषिभिः निर्व्यूढम्।

महर्षि-कृष्णद्वैपायनात् पूर्वं सप्तविंशतिः (२७) अन्ये ऋषयः 'व्यासपदं' सुशोभितवन्तः आसन्। इयं परम्परा ज्ञानस्य अविच्छिन्नां धारां स्पष्टं प्रदर्शयति।

## बहुभाषीय-कविसम्मेलनम्: संवेदनानां संगमः

कविसम्मेलने बिलासपुरस्य प्रतिष्ठित-रचनाकारैः स्वलेखन्या श्रोतारः मन्त्रमुग्धाः कृताः।

शिवकुमारशिवा-महोदयेन राष्ट्रभक्तिगीतस्य "तेरी मिट्टी में मिल जावां" इत्यस्य सुमधुरं संस्कृत- अनुवादं कृत्वा सर्वे भावविभोरिताः कृताः।डॉ. अमितशर्मा-महोदयः शास्त्रीय-मर्यादानुसारम् इन्द्रवज्राछन्दसि नलवाड़ी-मेलापकस्य संस्कृतिवर्णनं कृतवान्।

डॉ. अमनदीपशर्मा 'नलवाड़ी-पञ्चकम्' माध्यमेन मल्लयुद्धं लोक-संस्कृतिं च देववाण्यां ग्रथितवान्।

विशालठाकुरः सायंकालस्य पथिकस्य च संवादात्मकं काव्यपाठं कृतवान्।अरुणडोगरा-महोदयः समाजस्य द्विमुखि-चरित्रे कटाक्षं कुर्वन् उक्तवान् यत् अद्यतनकाले सत्यवादी 'उन्मत्तः' (पागल) इति मन्यते।परविन्द्रशर्मा स्वस्य "कौन-कौन बिक गए" इति कवतया पतनशील-सामाजिक-मूल्यानां तीक्ष्णं खण्डनं कृतवान्।अमरनाथ धीमानः जीवनस्य सरलतां "खुली किताब" (अनावृत-पुस्तकमिव) इति परिभाषितवान्।

डॉ. अनीताशर्मा सेवानिवृत्तेः पश्चात् समाजस्य आत्मीयानां च परिवर्तनशील-व्यवहारं "और बात बिगड़ गई" इति कवतया मार्मिकतया चित्रितवती।गायत्री-महोदया ब्रह्माण्डस्य विशालतां मनुष्यस्य 'भ्रमं' (अहङ्कारं) च आधारीकृत्य दार्शनिक-रचनां प्रस्तुतवती।सीमा-सांख्यायन-महोदया नवरात्र-उपलक्ष्ये देवीस्तुतिं कृत्वा वातावरणं भक्तिमयं कृतवती।

सन्देश-महोदया "मेले नलवाड़ियां जो आयां तू दूर" इति लोकगीतेन कहलूरी-संस्कृतेः माधुर्यं प्रस्थापितवती।कौशल्या-महोदया पारम्परिक-'सुहाग'-गीतैः कन्या-विवाहस्य भावनाः व्यक्तवती।

**निष्कर्षः**-अध्यक्षीय-उद्बोधने प्रो. लेखरामशर्मा हिमाचलस्य समृद्धा ऋषि-परम्परा तथा वैदिकीनां नदीनां (विपाशा-शतुद्रु-नद्योः) महत्त्वं रेखाङ्कितम्। असौ अकथयत् यत् हिमाचलस्य ग्रामाणां नामानि ऋषिभिः (विश्वामित्र- माण्डव्य- मार्कण्डेय- आदिभिः) वेदैः (विपाशा-शतुद्रु-नद्योः वर्णनेन) च सह सम्बद्धा सन्ति इति स्पष्टीकृतवान्।

कार्यक्रमस्य अन्ते सर्वेषां विदुषां कवीनां च आभारः प्रकटितः। अस्मिन् आयोजनेन सिद्धं यत् बिलासपुरस्य धरा न केवलं वीर-प्रसूता, अपि तु साहित्य-संस्काराणाम् अपि अक्षय-निधिः अस्ति।

हिमाचल-संस्कृत-अकादमी पक्षतः नरेन्द्रमहोदयः पवनशर्मा, जगदीशचन्दः च सर्वेषां अतिथीनां स्मृतिचिह्नेन सम्मानं कृतवन्तः।

अस्मिन्नवसरे विशेषेण प्रसिद्धसाहित्यकारः कुलदीपचन्देलः, रविन्द्रभट्टा, पूर्व जिलाभाषाधिकारिणी डॉ अनीता शर्मा, पूर्व संयुक्तनिदेशकः उच्चशिक्षा डॉ सुशीलपुण्डीरः, संस्कृतशिक्षकपरिषदः प्रदेशमहासचिवः डॉ अमनदीपशर्मा, वित्तसचिवः लोकपालः, सोहनलालः, बलदेवशर्मा, जिलाध्यक्षः डॉ अशोकः, महासचिवः सौरभः, वित्तसचिवः प्यारेलालः, मदन शास्त्री, एवं जनपदस्य ५० कवयः लेखकाः च उपस्थिता अभवन्।

# निर्वाचनायोगेन असम-केरल-पुदुचेरी-तमिलनाडु-पश्चिमबङ्गालराज्येषु निर्वाचनस्य सज्जतां, विधि-व्यवस्थायाः स्थितिं च समीक्षिता





निर्वाचन-आयोगेन निर्वाचन सज्जतायाः मूल्याङ्कनं कर्तु, समन्वयं स्थापयितुं, हिंसा-मुक्तं, प्रलोभनमुक्तं च निर्वाचनं सुनिश्चेतुं मतदानस्य कृते निर्दिष्टानां पञ्चराज्यानां तथा तेषां द्वादशसीमायुक्तानां राज्यानां केन्द्र-शासित-प्रदेशानां च वरिष्ठ-अधिकारिभिः सह समीक्षा-सभा आयोजिता। मुख्य-निर्वाचन-आयुक्तः ज्ञानेश-कुमारः निर्वाचन आयुक्ताभ्यां डॉ. एस.एस. सन्धु तथा डा. विवेक-जोशी इत्येताभ्यां सह असम-केरलम्-पुदुचेरी-तमिलनाडु-पश्चिमबङ्गालराज्येषु निर्वाचनस्य सज्जतां, विधि-व्यवस्थायाः स्थितिं च समीक्षितवन्तः ।

## आगामि-दिनद्वयोः केरलम्-माहे-प्रदेशयोः उष्ण-आर्द्र-ऋतोः पूर्वानुमानम्- ऋतु-विभागः


भारत-ऋतु-विभागेन आगामि-दिनद्वयोः केरलम्-माहे-प्रदेशयोः उष्ण-आर्द्र-ऋतोः पूर्वानुमानं प्रकटितम्। श्वः यावत् आन्ध्रप्रदेशे, मराठवाडायां, आन्ता-कर्णाटके, तटीय-कर्णाटके, मध्यप्रदेशे, उपहिमालयी-पश्चिमवङ्गे, सिक्किम्-प्रदेशे, पूर्वोत्तरराज्येषु च मेघगर्जनस्य, विद्युत्-स्खलनस्य च पूर्वानुमानम् अपि विभागेन कृतम्।

## बेलारुस्-देशस्य क्रीडिका आर्यना सबालेन्का प्रागुपान्त्य चक्रीये द्वन्द्व प्रविष्टवती



मियामी-ओपन्-टेनिस्-क्रीडायां बेलारुस्-देशस्य क्रीडिका आर्यना सबालेन्का इत्येषा फ़्लोरिडा-नगरे प्रागुपान्त्य चक्रीये द्वन्द्व प्रविष्टवती।

# प्रधानमन्त्रिणः मोदी-ट्रम्प-महोदययोः मध्ये वार्तालापः



नवदेहली:-प्रधानमन्त्रिणं नरेन्द्रमोदी-महोदयं प्रति अमेरिका-राष्ट्रपतिना डोनाल्ड ट्रम्प-महोदयेन दूरभाषः कृतः। सामाजिक-माध्यमे (Social Media) एकां प्रविष्टिं कुर्वन् श्रीमोदी अवदत् यत् ताभ्यां पश्चिम-एशिया क्षेत्रस्य स्थितेः विषये विचाराणां आदान-प्रदानं कृतम्।तेन उक्तं यत् भारतं क्षेत्रे तनावं न्यूनीकर्तुं तथा च शीघ्रतिशीघ्रं शान्ति-स्थापनाय पूर्णतः समर्थनं करोति। प्रधानमन्त्रिणा मोदी-महोदयेन प्रतिपादितं यत् भारतं 'होर्मुज-जलडमरूमध्यस्य' (Strait of Hormuz) सुरक्षां, सुलभतां तथा च तस्य मार्गस्य सदा उद्घाटितं रक्षणम् अनिवार्यं मन्यते, यतः एतत् सम्पूर्णविश्वस्य कृते परमावश्यकमस्ति।शान्ति-स्थिरतायै च क्रियमाणानां प्रयत्नानां सन्दर्भे द्वौ अपि नेतारी परस्परं सम्पर्के स्थातुं सहमतौ अभवताम्।

# (पेट्रोल-डीजलयोः) तैलमूल्यानां वृद्धिः जनसामान्यस्य कोषे आक्रमणमिव अस्ति- सांसदः अनुरागसिंहठाकुरः



**हिमसंस्कृतवार्ताः- हमीरपुरम्।** पूर्वः केन्द्रीयमन्त्री तथा सांसदः अनुरागसिंहठाकुरः हिमाचलप्रदेशस्य कांग्रेससर्वकारं प्रति पेट्रोल-डीजलयोः मूल्येषु ५ रूप्यकाणां वृद्धेः विषये तीक्ष्णं प्रहारं कृत्वा अवदत् यत् कांग्रेस-नेतारौ राहुलगान्धी, प्रियंकागान्धी च इत्ययोः "खटाखट-मॉडल" इदानीं "खटारा-मॉडल" अभवत्। सः उक्तवान् यत् जनहितार्थं कांग्रेसपक्षेन एषः जनविरोधी निर्णयः प्रत्याहर्तव्यः।अनुरागसिंहठाकुरः अवदत् यत् हिमाचले राहुलगान्धी-प्रियंकागान्धी-योः "खटाखट-मॉडल" इदानीं "खटारा-मॉडल" जातम्। एषः केवलं प्रदर्शनात्मकः दोषपूर्णश्च मॉडल सिद्धः, येन प्रदेशस्य स्थितिः अधिकं दुर्दशां प्राप्तवती। राज्य-सर्वकारेण कृतया ५ रूप्यकाणां वृद्ध्या पेट्रोल-डीजलयोः मूल्येषु सामान्यजनस्य कोषे आक्रमणं जातम्, येन जनानां वार्षिकरूपेण १००० कोटि-रूप्यकात् अधिकः अतिरिक्तः भारः भविष्यति। पूर्वमेव द्विवारं १० रूप्यकात् अधिकः वैट् आरोपितः, अधुना पुनः ५ रूप्यकाणां सेस् आरोप्य, कुलतः १५ रूप्यकाणां भारः जनानाम् उपरि आरोपितः इति तेन आरोपितम्।अनुरागसिंहठाकुरः अवदत् यत् कांग्रेस-सर्वकारस्य सत्तायां आगमनस्य केवलं द्विमासाभ्यन्तरे एव वैट निरन्तरं वर्धितः। डीजल-इन्धने वैट वर्धयित्वा १०.४० रूप्यकाणि कृतानि, तस्य अतिरिक्तं ५ रूप्यकाणां सेस् अपि आरोपितः। एषा प्रथमाः एव एषा सर्वकारः अस्ति या त्रिवारं सामान्यजनस्य कोषे आक्रमणं कृतवती। हिमाचलस्य इतिहासे एषा सर्वाधिकं विफल सर्वकारः अस्ति, या सर्वान् वर्गान् केवलं वञ्चयित्वा जनानां उपरि महङ्गतायाः भारं आरोपितवती। पूर्वं पेट्रोल-डीजल, बस-भाटकम्, सिमेण्ट-मूल्येषु वृद्धेः अनन्तरं पुनः पेट्रोल- डीजलयोः मूल्यवृद्ध्या हिमाचलवासिनां क्लेशः वर्धितः, तेषां मासिक-व्ययः अपि विकृतः अभवत्। अतः जनहिताय एषः निर्णयः प्रत्याहर्तव्यः।अनुरागसिंहठाकुरः अवदत् यत् अद्य हिमाचले ट्रक-चालकाः, कृषकाः, व्यापारी च सामान्यजनः पेट्रोल-डीजलस्य एतस्य मूल्यवृद्ध्या क्लिश्यन्ते, किन्तु एषा सर्वकारः अज्ञानावस्थायां सुप्ता इव दृश्यते। अस्य निर्णयस्य परिणामतः प्रदेशे सर्वत्र महङ्गतायाः वृद्धेः सम्भावना अस्ति। हिमाचलस्य कांग्रेस-सर्वकारः "मित्राणां मौज-सर्वकारः" इव जातवती। एकस्मिन् पक्षे करभारः, अपरस्मिन् पक्षे ऋणभारः वर्धते। अद्य हिमाचले कुलं ऋणं १ लक्ष ४ सहस्र-कोटि-रूप्यकाणां चिन्ताजनकस्थितिं प्राप्तम्। एषा सर्वकारः केवलं त्रिषु वर्षेषु ४६ सहस्र-कोटि-रूप्यकाणाम् ऋणं ग्रहीतवती इति तेन उक्तम्।

# देहल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितः विपक्षनेता जयरामठाकुरः; हिमाचल- सम्बद्ध- विषयेषु कृता चर्चा



**हिमसंस्कृतवार्ताः- नवदेहली।** पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः नवदेहल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह शिष्टाचार-मेलनं कृतवान्। अस्मिन् मेलने सः हिमाचलप्रदेशस्य विविध-ज्वलन्त-विषयेषु चर्चां कृतवान्। मेलनान्तरं वार्ताहरैः सह सम्भाषणकाले सः अवदत् यत् "प्रदेशस्य हितैः सम्बद्धेषु सार्थकविषयेषु विस्तरेण चर्चा अभवत्।" तेन आरोपः कृतः यत् राज्यस्य आर्थिक-स्थितिः अस्मिन् समये 'वित्तीय-आपत्कालः' (Financial Emergency) इव वर्तते। सः अवदत् यत् मुख्यमन्त्री 'अनाथ-विधवा-करं' (Cess) सङ्गृह्य सर्वकारं चालयितुम् इच्छति, येन राज्यं वित्तीय-गर्ते निमग्नं जातम्।

## वेतन-स्थगनस्य विषये टिप्पणी

जयरामठाकुरः अवदत् यत् संसाधनानां महत्याः न्यूनतायाः कारणात् मुख्यमन्त्रिणा स्वयं स्वकीय-वेतनस्य ५० प्रतिशतं भागं आगामि-षण्मासेभ्यः स्थगितुं निर्णयः गृहीतः। एवमेव मुख्यसचिवस्य आरक्षक-महानिदेशकस्य (DGP) च वेतने ५० प्रतिशतं, 'आईएएस' (IAS) अधिकारिणां मन्त्रिणां च वेतने ३० प्रतिशतं तथा च विधायकानां वेतने २० प्रतिशतं वेतनं स्थगितं कृतम् अस्ति।

## प्रवेश-करस्य (Entry Tax) विरोधः

तेन उक्तं यत् बाह्य-राज्येभ्यः आगच्छतां वाहनानां 'प्रवेश-करे' (Entry Tax) महती वृद्धिः कृता, या व्यावहारिकी नास्ति। अस्य पञ्जाब-सर्वकारेण अपि विरोधः कृतः, तैः अपि हिमाचल-वाहनेषु तादृश-करस्य आरोपणाय वार्ता कृता।

## पर्यटन-क्षेत्रे प्रभावः

जयरामठाकुरस्य मतेन ईदृशैः निर्णयैः राज्यस्य प्रमुखः व्यवसायः 'पर्यटनम्' विनङ्क्ष्यति। राज्यम् अस्मात् सङ्कटात् बहिः आनेतुं दृढ-रणनीत्याः आवश्यकता वर्तते। सः स्पष्टीकृतवान् यत् विपक्षः अस्य आर्थिकसङ्कटस्य निवारणाय रचनात्मकचर्चायै पूर्ण-सहयोगाय च सज्जः अस्ति, परन्तु एतत् तदैव सम्भवं यदा राज्यसर्वकारः जनविरोधीन् निर्णयान् स्थगयेत्।

# टी.एम.सी. (TMC) संस्थानेन 'रोबोटिक- व्हिपल- शल्यक्रियया' रचितः इतिहासः; केंसर- पीडितस्य रुग्णस्य रक्षिताः प्राणाः






**हिमसंस्कृतवार्ताः- काङ्गड़ा।** डॉ. राजेन्द्रप्रसादराजकीय-आयुर्विज्ञानचिकित्सा- महाविद्यालयस्य (टांडा-चिकित्सालयस्य) इतिहासे प्रथमा 'रोबोटिक व्हिपल शल्यक्रिया' (Robotic Whipple Surgery) सफलतापूर्वकं सम्पन्ना। टी.एम.सी. संस्थानेन उन्नत-शल्यचिकित्सायाः क्षेत्रे एका उल्लेखनीया उपलब्धिः प्राप्ता, येन नूतनः कीर्तिमानः स्थापितः। अत्र प्रथमवारं जटिला 'पैन्क्रियाटिकोड्यूओडेनेक्टॉमी' (Pancreaticoduodenectomy) इति रोबोटिक- प्रक्रियया सफला जाता। एषा ऐतिहासिकी शल्यक्रिया अस्मिन् क्षेत्रे 'गैस्ट्रोइंटेस्टाइनल- कर्कटस्य' (GI Cancer) प्रबन्धने अत्याधुनिक-रोबोटिक-तन्त्रज्ञानस्य स्वीकरणदिशि महत् पदम् अस्ति। एषा शल्यक्रिया पित्तनलिकायाः जटिलेन कर्कटरोगेण 'डिस्टल कोलेंजियोकार्सिनोमा' (Distal Cholangiocarcinoma) इति व्याध्या पीडितस्य रुग्णस्य उपरि कृता। मुख्य- शल्यचिकित्सकस्य डॉ. अङ्कित-शुक्लस्य नेतृत्वे एकेन कुशलदलेन एतत् कार्यं कृतम्, यस्मिन् डॉ. मुकेशः सहायक-शल्यचिकित्सकरूपेण आसीत्।

**नवघण्टात्मिका जटिला प्रक्रिया** अस्यां दीर्घायां जटिलायां च प्रक्रियायां संज्ञाप्रदाता-दलेन (Anesthesia Team) महत्त्वपूर्णा भूमिका निगूढा। मुख्य-संज्ञाप्रदातुः डॉ. श्याम-भण्डारिणः नेतृत्वे डॉ. भानु-गुप्तस्य कुशलेन सहयोगेन शल्यक्रिया निर्विघ्नं सञ्चालिता। अस्याः शल्यक्रियायाः कुल-अवधिः प्रायः नवघण्टाः (9 hours) आसीत्, या रोबोटिक- साहाय्येन क्रियमाणायाः अस्याः प्रक्रियां सूक्ष्मतां परिशुद्धतां च दर्शयति।

**रुग्णस्य शीघ्र-स्वास्थ्यलाभः**-पारम्परिक-रीत्या 'ओपन-सर्जरी' (Open Surgery) माध्यमेन अस्यां प्रक्रियायां रुग्णाय २ तः ३ सप्ताहाः यावत् चिकित्सालये स्थातव्यं भवति स्म, परन्तु रोबोटिक-दृष्टिकोणेन अल्पे एव काले रुग्णः स्वस्थः अभवत्। दशमे दिने एव रुग्णः स्थिरस्थितौ गृहं प्रेषितः (Discharged)। रोबोटिक-शल्यक्रियायाः लाभाः यथा— लघु-छिद्रः, अल्प-रक्तस्रावः, न्यून-पीडा तथा च शीघ्रं स्वास्थ्यलाभः अत्र स्पष्टं दृश्यन्ते।

**संस्थानस्य गौरवम्**-चिकित्सालय-प्रशासनेन अस्यां उपलब्धौ महद् गौरवम् अनुभवता पूर्णं दलम् अभिनन्दितम्। अनेन साफल्येन अधुना क्षेत्रस्य रोगिभ्यः दूरे स्थितान् 'टर्शरी-केयर-सेण्टर' (Tertiary Care Centres) प्रति गमनस्य आवश्यकता न्यूना भविष्यति। महाविद्यालय-प्रशासनेन अस्यै सहयोगाय माननीय-मुख्यमन्त्रिणः, स्वास्थ्यमन्त्रिणः, पर्यटन-अध्यक्षस्य च धन्यवादः ज्ञापितः।

# समयबद्ध-निदानेन चिकित्सा-उपलब्धता च स्ट्रोक-पीडितानां जीवनरक्षणं शक्यम्: जे.पी. नड्डा

नवदेहली-:केन्द्रीय-स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्री जगत् प्रकाश नड्डा महोदयः अद्य अवदत् यत् समयबद्ध-रोगनिदानेन, त्वरित-रेफरल-प्रक्रियया तथा च गुणवत्तापूर्ण-चिकित्सायाः उपलब्धतया जनानां जीवनं रक्षितुं शक्यते। अनेन 'स्ट्रोक' (Stroke) कारणात् जायमानां आजीवन-विकलाङ्गताम् अपि रोद्धुं शक्यते।

एतानि वचनानि सः 'फिक्की' (FICCI) इत्यस्य तृतीय-राष्ट्रिय-स्ट्रोक-शिखर-सम्मेलन-२०२६ (National Stroke Summit 2026) इत्यस्य आभासी-माध्यमेन (Virtually) सम्बोधनकाले उक्तवान्। श्री नड्डा महोदयः स्ट्रोक-रोगं महती स्वास्थ्य-चुनौती इति वर्णितवान्। सः अवदत् यत् एषः रोगः प्रायः विना पूर्वसूचनां व्यक्तिं, परिवारं समाजं च प्रभावितं करोति। मन्त्री महोदयः प्रधानमन्त्रिणः नरेन्द्रमोदी-महोदयस्य नेतृत्वे सर्वकारेण क्रियमाणानां प्रयासानां चर्चां कृतवान्,

# HP BUDGET SESSION - चम्बा-सहितं सम्पूर्णे प्रदेशे स्थापितानि सङ्गणक- आधारित- परीक्षाकेन्द्राणि- मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारेण राज्यविधानसभायां सूचितं यत् चम्बा-जनपदे एकं सङ्गणक- आधारित- परीक्षाकेन्द्रं (CBT Centre) स्थापितं वर्तते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः भाजपा-विधायकस्य जनकराजस्य प्रश्नेन उत्थापिते एकस्मिन् लिखित-प्रत्युत्तरे अवदत् यत् चम्बा- केन्द्रम् 'आउटसोर्स-एजेन्सी' (Outsource Agency) माध्यमेन स्थापितम् अस्ति, अस्यां सुविधायां च प्रतियोगात्मक-परीक्षाः (Competitive Exams) आयोजयिष्यन्ते। मुख्यमन्त्रिणा सूचितं यत् राज्यस्य विविधेषु भागेषु कुल २१ परीक्षाकेन्द्राणि 'आउटसोर्स' कृतानि सन्ति, यत्र चयन-प्रक्रिया सुव्यवस्थिता कर्तुम् अभ्यर्थिनां सौकर्यं वर्धयितुं च सङ्गणक- आधारित-परीक्षाः आयोज्यन्ते। मुख्यमन्त्री उक्तवान् यत् परीक्षाकेन्द्राणां सङ्ख्या स्थानं च आवेदकानां सङ्ख्यानुसारं निर्धारितं भवति। यत्र मुख्याः प्रारम्भिक-परीक्षाः प्रायः सर्वेषु जिला- मुख्यालयेषु भवन्ति, तत्र एव न्यून-अभ्यर्थि-युक्ताः अन्याः परीक्षाः चित-स्थानेषु (Selected locations) आयोज्यन्ते।

## चम्बा-क्षेत्रस्य अभ्यर्थिभ्यः लाभः

चम्बा-नगरे 'सीबीटी' (CBT) केन्द्रस्य स्थापनायाः जनपदे तेषां अभ्यर्थिनां महान् लाभः भविष्यति, ये पूर्वं शिमला-हमीरपुर-सदृशानि दूरस्थानि केन्द्राणि प्रति गच्छन्ति स्म, येन तेषाम् अतिरिक्त-व्ययः समयश्च नष्टः भवति स्म।

# हिमाचलप्रदेशे परिवर्तिताः पट्टा-नियमाः (Lease Rules); ४० वर्षाणां सीमा निर्धारीता, 'हिमुडा' संस्थायै ८० वर्षाणां शिथिलता

**हिमसंस्कृतवार्ताः:शिमला।** हिमाचलप्रदेशसर्वकारेण भूमि-पट्टा-नियमेषु संशोधनं कुर्वन् 'हिमाचलप्रदेश-पट्टा (संशोधनम्) नियमाः २०२६' इति प्रयोक्तुं अधिसूचना निर्गता। राजस्वविभागेन २३ मार्च २०२६ दिनाङ्के प्रसारित-अधिसूचनानुगुणं अधुना राज्यसर्वकारः सामान्य-परिस्थितिषु कामपि भूमिं ४० वर्षेभ्यः अधिक-अवधये पट्टे (Lease) न प्रदास्यति। यद्यपि, 'हिमुडा' (HIMUDA) संस्थायै विशेष-प्रावधान-अन्तर्गतं महती शिथिलता प्रदत्ता अस्ति। अधुना 'हिमुडा' संस्थायै आवासीय-नगर-विकास-परियोजना-भ्यः अधिकतमं ८० वर्षाणि यावत् भूमि-पट्टा प्रदानं कर्तुं शक्यते। सर्वकारस्य विश्वासः अस्ति यत् अनेन निर्णयेन राज्ये नियन्त्रित-नगर-विकासस्य गतिः वर्धिष्यते तथा च आवासीय-परियोजनाभ्यः दीर्घकालिका स्थिरता प्राप्स्यते।विभाषानुसारं संशोधनात् पूर्वं जनसामान्येभ्यः परामर्शाः आक्षेपाश्च आहूताः आसन्, परन्तु निश्चित-समये कापि प्रतिक्रिया न प्राप्ता। मङ्गलवासरे 'राजपत्रे' (Gazette) प्रकाशनेन सहैव एते नूतन-नियमाः प्रभावशीलाः अभवन्।

# काङ्गड़ा-विमानपतनस्य विस्ताराय ९.४१ हेक्टेयर-परिमितं निजी-भूमि-अधिग्रहणं भविष्यति; ६० दिनेषु आक्षेप-पञ्जीकरणस्य अवसरः



**हिमसंस्कृतवार्ताः- काङ्गड़ा।** प्रदेशसर्वकारेण काङ्गड़ा-जनपदस्य गग्गल-स्थिते विमानपतनस्य विस्तार-प्रक्रियायाः अन्तरे ९.४१ हेक्टेयर-परिमितं निजी-भूमि-अधिग्रहणं (Acquisition) करिष्यते। एतदर्थं कार्यम् आरब्धम् अस्ति। पर्यटन- एवं- नागरिक- उड्डयन- विभागेन निर्गतायाः प्रारम्भावस्थायाः अधिसूचनायाः अनुसारम् एषा भूमिः काङ्गड़ा-शाहपुर- उपमण्डलयोः १४ ग्रामेभ्यः स्वीकरिष्यते। अधिसूचनानुसारं येषां जनानां भूमिः अस्मिन् अधिग्रहण-प्रक्रियायां सम्मिलिता अस्ति, ते ६० दिनानां अन्तः स्वकीयान् आक्षेपान् लिखितरूपेण 'समाहर्ता' महोदयस्य समीपे पञ्जीकर्तुं शक्नुवन्ति। अस्य सहैव सर्वेक्षण-कार्यकाले कस्यापि प्रकारस्य बाधां न जनयितुं निर्देशाः दत्ताः सन्ति। सर्वकारेण एतत् अपि स्पष्टीकृतं यत् अधिसूचनायाः निर्गमनात् परं सम्बन्धित-भूमेः क्रय-विक्रयः, नामान्तरणं (Mutation) वा कस्यापि प्रकारस्य व्यवहारः (Transaction) अनुमत्या विना न कर्तुं शक्यते। भूमि-सम्बन्धितानि लेखपत्राणि उपमण्डलाधिकारिणः समाहर्त्ता-कार्यालयस्य च कार्यदिवसेषु द्रष्टुं शक्यन्ते।सर्वकारेण एतत् पदं 'भूमि-अर्जनं, पुनर्वासनम् एवं पुनर्व्यवस्थापनं (उचित-प्रतिकर एवं पारदर्शितायाः अधिकारः) अधिनियमः २०१३' इत्यस्य अन्तर्गतं स्थापितम् अस्ति। सर्वकारेण सर्वेषां प्रतिवेदनानां परीक्षणं कृत्वा परियोजनायै स्वीकृतिं दत्त्वा अधिसूचना निर्गता। अस्याः प्रक्रियायाः सञ्चालनाय धर्मशाला-स्थितं मण्डलायुक्तं (Commissioner), अतिरिक्त-मण्डलायुक्तं प्रशासकरूपेण (Administrator) तथा च काङ्गड़ा- उपमण्डलाधिकारिणं 'समाहर्त्ता' (Collector) रूपेण नियुक्तं कृतम् अस्ति।

# जलगाव-नगरे संस्कृत-सम्भाषण-शिबिरस्य सफलः समारोपः"




जलगाव-नगरात् — देवभाषा इति प्रसिद्धा संस्कृतभाषायाः प्रसार-प्रचारार्थं डॉ. महेन्द्र-शिरुडे-क्लासेस् संस्थायाः संचालकौ डॉ. महेन्द्रः शिरुडे तथा सौ. प्राजक्ता महेन्द्र-शिरुडे गतत्रिवर्षेभ्यः निरन्तरं कार्यरतौ स्तः। तयोः प्रयत्नेन दिनाङ्क १० मार्चतः १९ मार्च २०२६ पर्यन्तं दशदिनात्मकः विनामूल्यः "संस्कृत-सम्भाषण-वर्गः" आयोजितः आसीत्।अयं वर्गः आचार्यः अतुलः मनोहर-नाम्ना विदुषा मार्गदर्शनेन सफलतया सम्पन्नः। अस्मिन् वर्गे छात्रैः दैनन्दिनजीवनस्य व्यवहारिकसंवादाः, स्वपरिचयः, प्रश्नोत्तररूपेण वार्तालापः इत्यादयः विषयाः संस्कृतभाषायां अभ्यासिताः।

अस्य वर्गस्य समारोपः गुढीपाडवा इत्यस्य शुभसन्दर्भे उत्साहपूर्णतया सम्पन्नः। कार्यक्रमे मुख्य-अतिथिरूपेण जलगाव-नगर्याः प्रख्याता स्त्रीरोग-विशेषज्ञा डॉ. सरोजिनी पाटील उपस्थितवती। तया विद्यार्थिनां संस्कृतभाषायाः महत्त्वं प्रतिपाद्य प्रेरणादायिनी वाणी प्रदत्ता।कार्यक्रमस्य सञ्चालनं तथा अतिथेः परिचयः कु. मैत्रेयी महेन्द्र-शिरुडेया कुशलतया कृतः। प्रास्ताविकं कु. गार्गी महेन्द्र-शिरुडेया सुस्पष्टतया प्रस्तुतम्। अन्ते सौ. प्राजक्ता महेन्द्र-शिरुडेया आभारप्रदर्शनं कृतम्।

अस्य कार्यक्रमस्य विशेषता आसीत् यत् सम्पूर्णः समारोप-समारोहः संस्कृतभाषायामेव सम्पन्नः। छात्रैः संस्कृतभाषया गीतानि, कथाः, नाटिकाः च सादरं प्रस्तुताः। तैः छत्रपती संभाजी महाराज इत्यस्य वीरस्य बलिदान-गाथा अपि प्रभावकरूपेण प्रस्तुत्वा तस्मै भावपूर्णा श्रद्धाञ्जलिः अर्पिता।

एवं प्रकारेण एषः अभिनवः उपक्रमः संस्कृतभाषायाः प्रसाराय महत्त्वपूर्णः सिद्धः, तथा च नववर्षस्य मंगलमयं स्वागतं कृतम्।






हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -१५

समस्तं बहिरभ्यन्तरं जगत् विज्ञानमयम्। सर्वेषु स्थूलसूक्ष्मपदार्थेषु विज्ञानं हि ओतःप्रोततया संलग्नमस्ति। विज्ञानम् इत्युक्ते प्रमाणसिद्धं किञ्चन विशेषज्ञानम्। अत्र समस्तविषयो युक्तियुक्तप्रमाणादिषु आधारीभूतः। विज्ञानशिक्षायाः सर्वत्र विकासकारणतो मानवजातिः नानादिक्षु उपकृता दृश्यते, तथा एतस्य अत्याधुनिकावदानेन विशाला पृथ्वी अपि क्षुद्रग्रामवत् जातास्ति। विज्ञानसम्मतायाः मानसिकतायाः अधिकारप्राप्तये विज्ञानशिक्षाया एका विस्तृता भूमिका वर्तते, याञ्च अस्वीकर्तुं न शक्यते। विज्ञानशिक्षा विद्यार्थिभ्यः प्राथमिकपर्यायतः आरभ्य प्रकृति-परिवेशादीनां नानाविषयाणां सम्भेदान् प्रददाति। मानवस्य विवर्तनस्य समनन्तरं हि विज्ञानं पदे पदे अग्रे सर्तुं सक्षमं जातमस्ति। विज्ञानगवेषणा, नानाविष्कारसमूहश्च परवर्तिकालाय एकेन अक्षयकीर्तित्वेन अवलोक्यते। विज्ञानशिक्षायाः प्रयोजनीयताविषये पुनर्वक्तव्यं नास्ति; कारणं मानवजीवनयात्रायां विज्ञानस्य अवदानं सर्वविदितमेव। विज्ञानशिक्षा विद्यार्थिनां मनसि एकम् औत्सुक्यस्य एवं कौतुहलभावस्य उद्रेकं कर्तुं शक्नुयात्। विश्वप्रकृत्या नानाविषयाणां पुङ्खानुपुङ्खत्वेन ज्ञानाहरणेन सह विद्यार्थिनो विज्ञानाविष्कारसमूहस्य विषये सम्यक्तया ज्ञानलाभं विधाय विज्ञानस्य उच्चतराध्ययनं कर्तुम् उद्बुद्धा भवितुमर्हेयुः। विज्ञानशिक्षा छात्रान् प्रत्येकं विषये वैज्ञानिकरीत्या अनुसन्धानं कर्तुं प्रेरयति। यतोहि विज्ञानं प्रकृतिविषयकं हि अन्वेषणम्, एवञ्च प्रकृत्या सह मानवजीवनस्य नित्यसम्पर्को वर्तते; अत एव विज्ञानशिक्षा प्रकृतिसम्बद्धेन नानादिग्दर्शनेन सह छात्रेभ्यः प्रबोधयति, प्रेरयति च। विज्ञानशिक्षा समाजस्य प्रत्येकं स्तरीयस्य मानवस्य मध्ये विस्तारिता भवेदिति एतत्तु नितान्तम् आवश्यकमेव। एतस्याः शिक्षायाः अभावकारणतो हि मानवमनसः सङ्कीर्णता इतोऽपि नापगता। अतः कुप्रथा, अन्धविश्वासः इत्यादिभिः अधुनापि समाजः आवृतो दृश्यते। विज्ञानशिक्षायाः तीव्रप्रसारेण जनेषु विज्ञानसम्मता मानसिकता आनेतव्या। विज्ञानस्य सदुपयोगेन विश्वविकासः सम्भवति; अतो विज्ञानं मानवजात्याः कृते वरदानस्वरूपम्। परन्तु एतस्य दुरुपयोगो मानवकुलस्य विनाशाय भवति। मारणास्त्राणाम् आविष्कारः तत्प्रयोगश्च केवलं विनाशाय एव ; अत एव विज्ञानस्य दुरुपयोगो हि अभिशापभूतः कथ्यते। अतो विज्ञानं सर्वदा लोकहिताय हि मानवैः प्रयोक्तव्यमिति, अस्तु।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। एका वार्ता मया पठिता। एकया महिलया उच्चवेतनयुक्तं कार्यं त्यक्तम्। तथापि तया जीवने शान्तिः प्राप्ता। न्यूनवेतनस्य कार्यं स्वीकृतम् किन्तु अधिक-श्रम-नाशात् सा रक्षिता।

**काव्या-** नमस्ते नन्दिनि। तस्याः मानसिकं स्वास्थ्यं रक्षितम् इति अतीव उत्तमं वृत्तम्। मया अन्या वार्ता दृष्टा। वैज्ञानिकैः अजगराणाम् अध्ययनं कृतम्। भोजनानन्तरम् अजगराणां हृदयं वर्धितम्। मनुष्याणां चिकित्सा-विज्ञानाय इदं ज्ञानं तैः लब्धम्।

**नन्दिनी-** अहो, अजगरेभ्यः अपि वैद्यकीय-ज्ञानं प्राप्तम् इति आश्चर्यकरम्! अपरा वार्ता मया श्रुता। अमेरिकदेशे एका सुवर्णमुद्रा निर्मिता। तस्यां मुद्रायां ट्रम्पस्य चित्रम् अङ्कितम्। सङ्ग्राहकैः अस्य विषयस्य महान् विवादः कृतः।

**काव्या-** राजनैतिक-मुद्रायाः विवादः तु कुतूहलजनकः एव। अहम् अन्यां वार्तां पठितवती अस्मि। बेङ्गलूरु-नगरे एकया महिलया प्रयोगः कृतः। यान-सम्मर्दात् खिन्ना सा, द्वि-सप्ताहं यावत् कार्यालयात् गृहं प्रति पदयात्रां कृतवती अस्ति। सा यानात् पूर्वम् एव गृहं प्राप्तवती अस्ति।

**नन्दिनी-** नगरेषु यान-सम्मर्दस्य एषा स्थितिः खेदजनका! पदयात्रा एव शीघ्रतरा सिद्धा। अद्यतनः वार्ता-कार्यक्रमः अत्रैव समाप्तः। धन्यवादौ।

# महर्षि महेश योगी वैदिकविश्वविद्यालये ज्ञानवर्धकं च विशेषज्ञव्याख्यानस्य आयोजनम्





हिमसंस्कृतवार्ता। महर्षि महेश योगी वैदिकविश्वविद्यालये दिनाङ्के २४ मार्च २०२६ तमे दिवसे द्वादशवादने (१२:०० वादने) अत्यन्तमहत्त्वपूर्णं ज्ञानवर्धकं च विशेषज्ञव्याख्यानस्य आयोजनं कृतम्। एषः कार्यक्रमः अस्माकं माननीयकुलगुरोः प्रो. प्रमोदकुमारवर्मा-महोदयस्य संरक्षणे कृषिविभागेन आयोजितः।कार्यक्रमस्य शुभारम्भः महर्षेः गुरुपूजनस्य अनुष्ठानेन अभवत्, येन सम्पूर्णे वातावरणे आध्यात्मिकता सकारात्मकशक्तिश्च प्रसृता। ततः परं मुख्यवक्ता डॉ. गुरुदत्तमिश्र-महोदयेन (सेवानिवृत्त-मौसमवैज्ञानिकेन) PPT-प्रस्तुतीकरणस्य माध्यमेन ऋतुविज्ञान-कृषिऋतुविज्ञानयोः विस्तृता प्रभावशाली च सूचना प्रदत्ता।स्वीयव्याख्याने डॉ. नेहा मिश्रामहोदयया जलसंरक्षणम्, पर्यावरणसंरक्षणम्, वानिकी, वृक्षारोपणम्, मृदासंरक्षणम् तथा स्वचालित-ऋतु-केन्द्रम् (AWS) इत्यादिषु समसामयिकेषु महत्त्वपूर्णेषु च विषयेषु गहनं प्रकाशनं कृतम्। तेषां विचाराः उपस्थितान् प्राध्यापकान् छात्रांश्च आधुनिककृषिपद्धतिषु पर्यावरणीयसन्तुलने च जागरूकमकरोत्।अस्य कार्यक्रमस्य सुगठितं मंचसंचालनं श्री उमाकान्तत्रिपाठीमहोदयेन कृतम्, येन सम्पूर्णम् आयोजनम् अत्यन्तं सुव्यवस्थितं प्रभावशाली च अभवत्। कार्यक्रमस्य आयोजनं कृषिविभागस्य डॉ. हसमुखलालमहोदयेन डॉ. आजादकुमारसिंहमहोदयेन च कृतम्।अस्मिन् अवसरे विश्वविद्यालयस्य सर्वे प्राध्यापकाः छात्राश्च बहुसंख्यया उपस्थिताः आसन् तथा व्याख्यानस्य लाभं प्राप्तवन्तः। कार्यक्रमस्य समापनावसरे डॉ. के. के. त्रिपाठीमहोदयेन सर्वेषां कृते धन्यवादा प्रदत्ताः। तेन एतादृशानां ज्ञानवर्धक-आयोजनानां निरन्तरम् आयोजनस्य आवश्यकता अपि प्रतिपादिता।एषः कार्यक्रमः विश्वविद्यालयस्य शैक्षणिक-शोधपर्यावरणस्य समृद्ध्यै अत्यन्तम् उपकारकः सिद्धः।

## "लौकिकन्यायकोशः"

# "वनव्याघ्रन्यायः"

व्याघ्रः सर्वेषां वन्यप्राणिनां सहसा वधं मा करोतु इति वन्यप्राणिनः व्याघ्रस्य रक्षणं कुर्वन्ति। वनं सुरक्षितं भवतु इति व्याघ्रः तेषां रक्षणं करोतु। एवं वनव्याघ्रयोः परस्परसहकार्यं भवति।
{१} न स्याद् वनमृते व्याघ्रात् न स्युः व्याघ्राद् ऋते वनं, वनं हि रक्ष्यते व्याघ्रेः व्याघ्रान् रक्षति काननम्। [महाभारते उद्योगपर्वणि ३७-४२]

**डा वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# संस्कृत-हास्यकणिकाः

## १. यमराजः च वैद्याः

यमराजः स्वदूतं पृच्छति— "रे दूत! पृथिव्यां मम कार्याय के के सहायकाः सन्ति?"
दूतः— "महाराज! तत्र बहवः वैद्याः (Doctors) सन्ति।"
यमराजः— "कथम्?"
दूतः— "यतः भवान् तु केवलं प्राणान् हरति, परं वैद्याः तु प्राणेन सह धनम् अपि हरन्ति!"

## २. पति-पत्नी संवादः

पत्नी— "अये भो! शृणोतु, अहं चिन्तयामि यत् अस्माकं पुत्रः तु अतीव बुद्धिमान् अस्ति।"
पतिः— "आम्, सत्यम्! तस्य बुद्धिः तु मयि एव गता अस्ति।"
पत्नी— "निश्चयेन! मम बुद्धिः तु अद्यापि मयि एव अस्ति, अतः तस्य पार्श्वे भवतः एव बुद्धिः स्यात्!"

## ३. आलस्यस्य पराकाष्ठा

शिक्षकः— "छात्र! अस्माकं देशस्य 'राष्ट्रपशुः' कः अस्ति?"
छात्रः— "महोदय! 'सिंहः' "
शिक्षकः— "शोभनम्! तर्हि वद, 'व्याघ्रः' (Tiger) कः अस्ति?"
छात्रः— "महोदय! यदा सिंहः 'मेकअप' करोति, तदा सः व्याघ्रः दृश्यते!"